**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 5
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# श्री वैखानस भगवच्छास्त्रोक्त ध्वजारोहणविधि:

Dr. T. Brahamacharyulu
Assistant Professor, Department of Vaikhanasa Agama, Sri Venkateswara Vedic University, Tirupati

**Article Info**
**Publication Issue :**
September-October-2023
Volume 6, Issue 5
**Page Number :** 102-105
**Article History**
Received : 01 Sep 2023
Published : 29 Sep 2023

**शोधसारांश**:- पर व्यूह विभव अन्तर्यामि अर्चा स्वरूपिन: परमात्मने बहव: उपचारा: तथैव राज राष्ट्र ग्राम यजमान आचार्य अर्चक पाचक परिचारकादि सर्वजनहिताय नित्य नैमित्तिक काम्य भेदेन अर्चन स्नपन उत्सवा: क्रियमाना:सन्ति।तेषु अर्चनं विशिष्ठस्थानं आवहति । इदमर्चनं षट्कालार्चनत्वेन प्रतिनित्यं आलयेकर्तव्यमिति श्रीवैखानसभगवच्छास्त्रं सश्रद्धं बोधयति।

**कुञ्जिका**-ध्वजारोहणविधानं, महत्वं, प्रकरणानि, आवश्यकता, वैशिष्ट्यम्, यजमानस्य भक्तनाञ्च तुष्टि:, पुष्टि:, धनसंपदश्च अभिवृद्धिम्।

**प्रत्यूष: प्रभातश्च मध्याह्नश्चापराह्णक:।**
**सायंकालो अर्धरात्रिश्च पूजाकालस्तु षट् स्मृता:** [1] **।।इति**

न केवलं अर्चनामात्रं उत्सवा: अपि नित्य नैमित्तिक पक्ष मास अयन संवत्सर भेदेन अनेके शास्त्रा: उपदिष्टा:।तत्रापि नित्योत्सव इत्युक्ते द्वादशमासेषु ऐकस्मिन् मासे अब्दंप्रतितत्काले संकल्प्य क्रियते स नित्योत्सव: इति नाम्ना उल्लेख: शास्त्रग्रन्थेषु दृश्यते।अत्र उत्सवं नाम उदित्युकृष्ट वचनं सवोयज्ञ उदाहृत:इत्युक्तं अर्थात् उत्कृष्ट यज्ञमेव उत्सव इति

अर्ध:।ऐतादृश ब्रह्मोत्सवे ध्वजारोहणपर्यन्तं य: क्रिय: उपन्यस्ता: ता: प्रधाना: भवन्ति। तत्रापि प्रधाना: क्रिया: ध्वजारोहणक्रिया:।अत्र उत्पत्तिद्वयं वर्तते।ध्वजस्यारोहणं ध्वजारोहणं इति ऐवं ऐतादृश ध्वजारोहण विषयं प्रयोगपुरस्सरं अत्र निवेदइतुं प्रवृत्तिसंपादयामि।

**ध्वजारोहणम्** - जयं करोति देवानां ध्वंसयित्वाऽसुरानपि।
ध्वंसना ध्वजमित्यभिधियते।।

असुराणां ध्वंस:, देवानां जयं करोति अत: ध्वज: इति प्रकीर्त्यते।तादृशध्वजस्य आरोहणं देवस्योत्सवादौ सकलदेवता समाह्वानार्थं कर्तव्यमिति प्रतिपादितम् । ध्वजलक्षणप्रमाणादीनि पूर्वमेवोक्तनि।

ध्वजारोहणविधि: - बलिनिर्वारणानन्तरं चक्रादीन् स्वस्वस्तानेषु संस्थाप्य, ध्वजदण्डस्थानमाविश्य ध्वजपटं यानादवरोप्य, पाद्याद्यैरभ्यर्च्यानुमान्य घण्टायुतं ध्वजपटं **स्वस्तिदाविशस्पतिरिति** यन्त्ररज्जुना बन्धयित्वा, आचार्य: प्राङ्मुख उदङ्मुखो वा भूत्वा सुपर्णोसीति मन्रमुच्चरन् यन्त्ररज्जुसाहाय्येन दण्डाग्रपर्यन्तमुन्नीयात् तत:भूरसि भूरिति मन्त्रेण संस्थापितस्य ध्वजदण्डस्य मूलं हस्ताभ्यामवलंब्य ध्वजं प्रतिष्ठापयामीति प्रतिष्ठाप्यासनाद्यैरर्चयित्वा, मुद्रान्नं निवेद्य पानीयाचमनमुखवासान्निवेदयेत् इति विमानार्चनाकल्प क्रियाधिकार समूर्तार्चनाधिकार ज्ञानकाण्डेषु सुस्पष्ठमभिहितम्।

यज्ञाधिकार प्रकीर्णाधिकारयो: एवमेवोक्त्वा परं घन्टाशङ्ककाहल संयुतमारोपयेदिति विशेषेणोक्तम्।गरुडस्तुति विशेषेणोक्तं प्रकीर्णे। खिलाधिकारे तु आरोहणात्पूर्वं दशदानानि द्विजक्षिणां च दत्वा विशेषेण पटे दर्भमालाचूतपत्रतोरणादिनी च बन्धयेदिति युक्तम्।

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

एवमारोपितध्वजं यावदवरोहणान्तं तावत् सप्तविंशतिविग्रहैः उत्तममध्यमाधमभेदेन त्रिकालं द्विकालमेककालं वार्चयित्वा, हविर्निवेदयेदिति सर्वासु संहितासु च नियमेनोक्तम्।

**ध्वजस्य गरुडप्रसादवैभवम्** – सकलदेवतासमाह्वानार्थं ध्वजदण्डाग्रे प्रतिष्ठापित गरुडाय निवेदितस्य प्रसादस्य पुत्रप्रदत्वं फलं विशेषेणोक्तं भगवच्छास्त्रे।या स्त्री पुत्रकामी च सती तत्प्रसादमाश्रीयते सा बलारोग्यायुष्मन्तं पुत्रं प्रसूयेतेति सर्वासु संहितासु मुक्तकण्ठेनोक्तम्।

**गरुडप्रसादस्वीकरणे नियमाः –** एवं पुत्रार्थम् अविवाहिताद्विवाहार्तम् एवं रोगिनिवारणार्थं सर्वविजयार्थञ्च गरुडप्रसादमस्नीयादिति अस्य प्रसादस्य सर्वाभीष्टसिद्धिमत्वमुक्तं वासाधिकारे।
ये प्रसादस्वीकरणार्थमागताः ते (स्त्रियः) पादप्रक्षालनमाचमनीयं च कृत्वा जितेन्द्रियस्सन् गरुडस्याग्रे स्थित्वा पस्चात् प्रसादं स्वीकृत्य,आचार्याय यथेष्टं दक्षिणां दत्वा,मनसा ध्यात्वा कृतार्थोऽहमिति अत्यन्तभक्त्या गरुडं सम्प्रणम्य ततः प्रसादं भक्षीयात् इति वासाधिकारे व्याख्यातम् ।अत्र यस्तु वीपरीताचारः तस्यफलं न विघ्यत इति च प्रोक्तम्।

**गरुडवीक्षणफलम्-** ध्वजारोहणानन्तरं ध्वजस्थगरुडः याषु याषु दिक्षु वीक्ष्यत् तत्र तत्र फलिविचारः वासाधिकारे विशेषेण एवं प्रपञ्चितः।
यथा –
प्राक् पश्चिमोत्तरवीक्षणं सर्वसिद्धिदम्।वायव्यैशान्यवीक्षणं वर्षधान्याभिवृद्धिदम्।अन्यासु दक्षिणाग्नयवायव्येषु दिक्षु निरीक्षणं तु व्याधिपीडनं भवतीति भृगुणा वासाधिकारे प्रोक्तम्।

**आभिरूप्याचबिम्बस्य सदासन्निहितोहरिः**

**ध्वजारोहणसमयः –** संहितासु ध्वजारोहणसमयनिर्णयः बहुधा दृश्यते। विमानार्चनाकल्प – यज्ञाधिकार – क्रियाधिकार – वासाधिकारेषु एवं समूर्तार्चनाधिकरणे ज्ञानकाण्डे च मरीचि भृग्वत्रिकाश्यपैः सायंकाले ध्वजारोहणमिति कण्ठरवेणोक्तम्। परन्तु खिलाधिकार प्रकीर्णाधिकारयोः समयप्रस्तावः न कृतः। किन्तवत्र बलिहरणादिकार्याणि प्रतरारभ्य क्रमेण करणीयानीति निर्णीतम्। अत एवं अनुमीयते ध्वजारोहणं प्रातःकालिककृत्यमिति।प्रकीर्णाधिकार क्रियाधिकारयोः रात्रावपि आचरितुं शक्यत इति केचित्पक्षं प्रपञ्चितम्।अधुना लभ्यमानेषु प्रकरणग्रन्थेषु रात्रौ ध्वजारोहणं न दृश्यते। परन्तु केचन औत्तरदेशीयक्षेत्रेषु रात्रावेव कुर्वन्ति ध्वजारोहणम्।
दक्षिणात्याः केचन तत्र तत्रालयेषु ध्वजारोहणं सायंकाले कुर्वन्ति।नेल्लूरु चित्तूरु जनपदयोः विशेषेण तिरूमलादिक्षोत्रेषु सायंकाले एव तत्रैव पुनः ति. ति. देवस्थानेषु केषुचन क्षेत्रेषु प्रातःकाले एव कुर्वन्ति। एवं सर्वत्रालवलोकनेनैव ज्ञायते महर्षिभिरेव उक्तत्वात् तत्तत्क्षेत्रीय प्रान्तीयसाध्यऽसाध्यानवलोक्य ऊहापोहविधानेन ध्वस्तसंशयमानसाः आचार्यादयः यदा समुचितं तदा विचिन्त्य अकुर्वन्निति तदारभ्य तत्तत्क्षेत्रेषु तदा एव प्रचलतीति च।

**केचन साम्प्रदायिकपण्डितैः एवमुच्यते ( वेदान्तं देशिकाचार्यमहोदयः)**

**चाद्रमाने तु सर्वत्र रात्रौ ध्वजरथोत्सवौ।**
**सौरमाने तु सर्वत्र प्रातः ध्वजरथोत्सवौ ।। इति**

परन्तु एषा कारिका उपलभ्यमान वैखानससंहितासु न दृश्यते।

**पांचरात्रसंहितासु एवमुक्तम् –**

**वधूप्रवेशे तु निशिप्रशस्तं राज्ञः प्रवेशे तु दिशि प्रशस्तम् ।**
**दिवा च रात्रौ च गृहप्रवेशः पूर्वे ध्वजारोहणमर्धरात्रौ ।। इति।**

महर्षिभिरेवाभिहितत्वात् तत्तत्परम्परागतक्रममनुसृत्य ध्वजारोहणे कृते शास्त्रविरोधो नैव भवेत् ।
अनेन ध्वजारोहणेन आधयःव्याधयः नश्यन्तीति च प्रतिपादितम्।
यथा–

**समुच्छिते ध्वजे तत्र व्याधयोऽप्याधयोऽपि वा।**

**भयङ्कराणि भूतानि विनश्यन्ति न संशय:।।**

अतस्सर्वेषूत्सवेषु आदौ ध्वजारोहणं निश्चयेन वैभवेन च करणीयमिति सकलसंहितासार:।

उपसंहार:- ऐतादृश उत्कृष्टयज्ञ: ध्वजारोहणोन सफलसामेष्यति इति ऐतावत्पर्यन्तं अस्माकं दृष्टं।इदं ध्वजारोहणं भृग्वत्रि मरीचि कश्यपादय: स्व स्व ग्रन्थेषु सविस्तरं निरूपयामासु: तादृशं ध्वजारोहणं यदिवयं द्रक्ष्याम: शुभपरंपरावाप्य:श्रेयोवन्त: अवश्यं भवम: इति शास्त्रांशं विषय: परिशोधना पुरस्सरं निरूपित:।

**आभिरूप्याचबिम्बस्य सदासन्निहितोहरि:**

**पादटिप्पणि**

1.प्रकी.अ.18श्लो.249

2.श्रीचरणसमाराधनदिव्यसूक्तरत्नावळि:-पृ 59

3.ब्रह्मलोकाद्देवानुत्सावार्थं समाह्वन्तं च।विमा - पृ -321

4.विमा - पृ - 325

5.क्रिया - 14अ,24 त: 26 श्लो

6.समू - 54अ- 73,74श्लो

7.कास्य.ज्ञा -पृ - 176

8.स्वस्तिदा इति मन्त्रेण बध्नीयाद्रज्जुना सह।।

यन्त्रेण मतिमान् पश्चात् प्राङ्मुखो वाप्युदङ्मुख:।

दण्डाग्रे योजयेत्पश्चाच्छाङ्खकाहळसंयुतम् ।।

समाबद्ध्य पुन: स्त्रिग्धं भूरसीति जपन् पुन:।

अभिमन्त्र्य ध्वजं पश्चान्मुदासनाद्यं सर्वमर्चयेत्।

पुण्याहं वाचयेत्पश्चान्मुद्रान्नं तु ध्वजस्य च।

निवेद्य मुखावासं प्रणाममपि कारयेत्।। यज्ञा - 39अ - 44 त: 47 श्लो

9.प्रकी - 24 अ 125 त: 128 श्लो

10. नमो नमस्ते पक्षीन्द्र - विध्नानि जहि सर्वाणि आत्मासात्कुरुमामपि ।। प्रकी - 24 अ - 131 त: 139 श्लो

11.दशदानञ्च कृत्वैव द्विजेभ्यो दक्षिणां ददेत्।

स्थापितश्चेद् ध्वज: पूर्वं यथाशास्रं क्रमेण वै।। खिला - 32 अ- 50 श्लो

12.उत्तमं च त्रिसन्धायसु हविस्सम्यन्यङ्मिवेदयेत्।

प्रातर्मध्याह्वयोर्मध्यं मध्याह्वे त्वधमं विदु:।। समू -55 अ 81 श्लो

ध्वाजारोहणं यावत्तावन्मूर्त्या विशेषत:।

त्रिकालं वा द्विकालं वा एककालमथापि वा ।।

हवि:सम्यङ्निवेद्यैव सप्तविंशतिविग्रहै: । यज्ञा - 39 अ,50,51 श्लो

प्रकी 24अ,141श्लो, वासा - 31अ - 152श्लो, खिला - 32अ - 56श्लो, क्रिया-14अ -26श्लो, विमा पृ-325, काश्य.ज्ञा.पृ - 176

13. विमा- पृ-325, यज्ञा- 33अ,48,49श्लो, प्रकी - 24अ- 129,130 श्लो,खिला- 58,59श्लो, समू- 55अ-79,80 श्लो

14. तन्निवेदितमन्नाद्यं पृथिक्पिण्डानि कारयेत्।।

स्त्रियास्चाहूय पुत्रार्थं विवाहार्थँ तथैव च।

पुत्रार्थी मृतपुत्री वा रोगीशतृजयार्थीनः।।वासा–31अ–68,69श्लो

15.शुचिसमाहितो भूत्वा गारूडं सम्प्रणम्य च ---

विपरीताचारो यस्तु फलं तस्य न विद्यते ।।वासा31अ – 79तः82श्लो

16. प्रागुत्तरञ्च वारुण्यां वीक्षणं सर्वसिद्धिदम्।।

एवं संकल्प्य मतिमान् दिक्पालं सम्परीक्ष्येत्।।वासा31अ– 148तः 150श्लो

17. साये ध्वजारोहणं कारयेत्। विमा पृ –319

18. यज्ञा –31अ – 1श्लो

19. प्रदोषकाले समनुप्राप्ते ध्वजारोहणमाचरेत्।

तद्रात्रावुत्सवान्ते तुतीर्थाङ्कुरमथाचरेत् ।। क्रिया 14अ 25श्लो

20. तथैव सायात्पूर्वे तु घोषणार्थं व्रजेद्गुरुः.

गजाश्वरथसंयुक्तं यात्रायां या दिशा प्रोक्ता।। वासा – 31अ– 88श्लो

21. प्रदोषे समनुप्राप्ते ध्वजमारोपयेत्पुनः। समू–54अ 69श्लो

22. काश्य.ज्ञा.पृ.–176

23.ध्वजस्यारोहणं रात्रावपि कुर्वन्ति केचन । प्रकी– 24अ 150श्लो

24.देवानां घोषणं कुर्याद्रात्राविति च केचन ।क्रिया–14अ 29श्लो

25. पा–आ–वि–बो–पृ–46

26. समू– 54अ–75श्लो

**उपयुक्तग्रन्थसूची**

1.विमानार्चनाकल्पः– सम्पादकः–अग्निहोत्रं श्रीनिवासाचार्युलु, श्रीवेङ्कटेश्वरस्वामि देवस्थानम्, द्वारकातिरुमल,तेलुगु,2014 वत्सरः

2. खिलाधिकारः, सम्पादकः– पार्थसारथि भट्टचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997

3.वासाधिकारः, सम्पादकः–दीवि.वेङ्कटरामाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997

4.प्रकीर्णाधिकारः, सम्पादकः–एम् के श्रीनिवासभट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997

5.समूर्तार्चनाधिकरणं,सम्पादकः– पि.रधुनाथचक्रवर्तिभट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 2014

6.क्रियाधिकारः– सम्पादकः– पार्थसारथि भट्टचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1998

7.ज्ञानकाण्ड– सम्पादकः– पार्थसारथि भट्टचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997

8.यज्ञाधिकारः– सम्पादकः– पार्थसारथि भट्टचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1999